# sannAmabhUShaNastotram

# सन्नामभूषणस्तोत्रम्

## Document Information

Text title : sannAmabhUShaNastotram

File name : sannAmabhUShaNastotram.itx

Category : vishhnu, krishna, puShTimArgIya

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# सन्नामभूषणस्तोत्रम्

गोपालाय धराधरेन्द्रपतये स्वीयार्तिहत्रे सुर-
त्रासाम्भोधिनिमग्नदेवनिचयोद्धर्त्रे यशोदात्मने ।
श्रीमन्नन्दसुताय गोपवनितासंलालिताय ध्रुवं
कण्ठस्थापितकौस्तुभाय जलदश्यामाय तुभ्यं नमः ॥ १॥

यन्नामलवसंस्पर्शान्न तिष्ठति पराश्रयः ।
तं गोपीहृदयानन्ददायकं प्रभुमाश्रये ॥ २॥

यन्नामसम्भावनया गजेन्द्रो ग्राहाद्विमुक्तः परमं पदं च ।
जगाम तन्नामशतं च साष्टकं वदाम्यहं भक्तियुतो यथामति ॥ ३॥

पूर्वं श्रीवासुदेवेन नाम्नामष्टोत्तरं शतम् ।
कृतं यस्य क्रमात्तस्य तत्तन्नामानुसारतः ॥ ४॥

छन्दोऽनुष्टुबृषिः कर्त्ता देवो गोवर्द्धनाधिपः ।
सर्वेष्टफलसिद्ध्यर्थे विनियोग उदाहृतः ॥ ५॥

गोपालः परमानन्दो यशोदानन्दनन्दनः ।
वसुदेवात्मजः श्रीशो वासुदेवः सनातनः ॥ ६। -।
पीताम्बरो जगत्त्राता माधवो भक्तवत्सलः ।
अनन्तकीर्तिर्यज्ञेशः सर्वज्ञः सर्वमङ्गलः ॥ ७॥

वनमाली सूर्यकोटिप्रतीकाशो महाबलः ।
विश्वम्भरः कृपासिन्धुः पुरुषः पुरुषोत्तमः ॥ ८॥

कौस्तुभोद्भासितोरस्कः कृपालुर्जगतां पतिः ।
मथुरागमनोद्भूतमङ्गलाक्रान्तगोकुलः ॥ ९॥

कालीयस्य फणोत्पन्नमणिभूषितविग्रहः ।
पद्मनाभः शेषशायी गोगोपगोपिकापतिः ॥ १०॥

निरञ्जनः प्रतापी च जगदानन्दकारकः ।
नटाकृतिर्यदूनां च कुलचूडामणिर्विभुः ॥ ११॥

कन्दर्पकोटिलावण्यः परमाद्भुतरूपधृक् ।
कमलाधिपतिः स्वामी सर्वदेवेशनायकः ॥ १२॥

चतुर्भुजश्चतुर्मूर्तिश्चतुर्वर्गविशारदः ।
नारायणः सर्वरूपः सर्वदा पूतमानसः ॥ १३॥

श्रीकृष्णः केशिसंहर्त्ता मुरारिर्देवकीसुतः ।
सर्वारिष्टान्तकः सर्वपूरकः सर्वभाववित् ॥ १४॥

खरदुष्टिनिराकर्त्ता तुलसीदासवल्लभः ।
पूरिताखिलभक्तादिहृद्युत्पन्नमनोरथः ॥ १५॥

उपेन्द्रः सर्वशक्तिश्च वरदेशो महोदधिः ।
सोमवंशोद्भवो विष्णुः सर्वात्मा सद्गुणार्णवः ॥ १६॥

गोपिकागृहसम्भूतनवनीतलवप्रियः ।
धूलिधूसरिताङ्गश्च कमलारुणलोचनः ॥ १७॥

गोवर्द्धनाद्रिधारी च तत्स्थिताखिलरक्षकः ।
प्रमेयोत्पन्नसद्भावसफलीकृतगोपिकः ॥ १८॥

तिरस्कृतहरीणाक्षः पूतनाप्राणघातकः ।
देवोऽच्युतो व्रजेशश्च सर्वधर्मपरायणः ॥ १९॥

वृन्दावनप्राणपतिः सत्यवक्ता धुरन्धरः ।
कृतरासादिसन्नृत्यसादीभूतवपुर्जनः ॥ २०॥

नन्दापदश्च संहर्त्ता बालगोपालचेष्टितः ।
दामोदरो विश्वमूर्तिर्धेनुकारिः प्रलम्बहा ॥ २१॥

वातासुरारिर्गोविन्दः कंसघ्नो गोकुलोत्सवः ।
देवेन्द्रदर्पसंहर्त्ता रुक्मिणीप्राणवल्लभः ॥ २२॥

समस्तदुष्टहर्त्ता च मोक्षदो गरुडध्वजः ।
योगीश्वरो जगत्पूज्यो महोदारचरित्रवान् ॥ २३॥

उद्वहः श्रीयशोदादिलालितो मधुसूदनः ।
समुद्रकोटिगम्भीरः सप्तलोकैकमण्डनः ॥ २४॥

जगदेकस्फुरत्ख्यातिर्धरासद्गतिनाशनः ।
सत्यभामाप्राणपतिर्यमुनाजलकौतुकी ॥ २५॥

सन्नामभूषणाख्यं वै स्तोत्रं यः प्रपठेत्सुधीः ।
कण्ठे लिखित्वा संस्थाप्य सोऽपि विष्णुर्न संशयः ॥ २६॥

गोकुलेशं नमस्कृत्य स्तुत्वा भक्त्या विचारितम् ।
तस्माद्गोपालभक्तानामस्तु बुद्धिप्रसारणम् ॥ २७॥

प्रोक्तानि यानि नामानि भूषारूपाणि तानि सः ।
दध्यादङ्गेषु सर्वेषु त्रैलोक्यविजयी भवेत् ॥ २८॥

इति सन्नामभूषणं स्तोत्रं समाप्तम् ।

Proofread by PSA Easwaran

*sannAmabhUShaNastotram*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*